# Raja Nalakritam Charmamundadevi Stotram

# રાજા નલકૃતં ચર્મમુણ્ડાદેવીસ્તોત્રમ્

## Document Information

Text title : Raja Nalakritam Charmamundadevi Stotram

File name : rAjAnalakRRitaMcharmamuNDAdevIstotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 54/19-27||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2025

*sanskritdocuments.org*

# રાજા નલકૃતં ચર્મમુણ્ડાદેવીસ્તોત્રમ્

તતઃ સ મૃણમયીં કૃત્વા ચર્મમુણ્ડધરાં નૃપઃ ।
વિભવાભાવતઃ પશ્ચાત્ફલમૂલૈરતર્પયત્ ॥ ૧૭॥

તતસ્તસ્યાઃ સ્તુતિં કૃત્વા પુરઃ સ્થિત્વા કૃતાઞ્જલિઃ ।
શ્રદ્ધયા પરયા યુક્તો નિષધાધિપતિઃ સ્વયમ્ ॥ ૧૮॥

જય સર્વગતે દેવિ ચર્મમુણ્ડધરે વરે ।
જય દૈત્યકુલોચ્છેદદક્ષે દક્ષાત્મજે શુભે ॥ ૧૯॥

કાલરાત્રિ જયાચિન્ત્યે નવમ્યષ્ટમિવલ્લભે ।
ત્રિનેત્રે ત્ર્યમ્બકાભીષ્ટે જય દેવિ સુરાર્ચિતે ॥ ૨૦॥

ભીમરૂપે સુરૂપે ચ મહાવિદ્યે મહાબલે ।
મહોદયે મહાકાયે જયદેવિ મહાવ્રતે ॥ ૨૧॥

નિત્યરૂપે જગદ્ધાત્રિ સુરામાંસવસાપ્રિયે ।
વિકરાલિ મહાકાલિ જય પ્રેતજનાનુગે ॥ ૨૨॥

શવયાનરતે રમ્યે ભુજઙ્ગાભરણાન્વિતે ।
પાશહસ્તે મહાહસ્તે રુધિરૌઘકૃતાસ્પદે ॥ ૨૩॥

ફેત્કારારવશોભિષ્ઠે ગીતવાદ્યવિરાજિતે ।
જયાનાદ્યે જય ધ્યેયે ભર્ગદેહાર્ધસંશ્રયે ॥ ૨૪॥

ત્વં રતિસ્ત્વં ધૃતિસ્તુષ્ટિસ્ત્વં ગૌરી ત્વં સુરેશ્વરી ।
ત્વં લક્ષ્મીસ્ત્વં ચ સાવિત્રી ગાયત્રી ત્વમસંશયમ્ ॥ ૨૫॥

યત્કિઞ્ચિત્ત્રિષુ લોકેષુ સ્ત્રીરૂપં દેવિ દૃશ્યતે ।
તત્સર્વં ત્વન્મયં નાત્ર વિકલ્પોઽસ્તિ મમ ક્વચિત્ ॥ ૨૬॥

યેન સત્યેન તેન ત્વમત્રાવાસં દ્રુતં કુરુ ।
સાન્નિધ્યં ભક્તિતસ્તુષ્ટા સુરાસુરનમસ્કૃતે ॥ ૨૭॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે ચતુઃપઞ્ચાશત્તમાધ્યાયાન્તર્ગતં
રાજા નલકૃતં ચર્મમુણ્ડાદેવીસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૫૪/૧૯-૨૭ ॥

skandapurANa . nAgarakhaNDa . adhyAya 54/19-27..

Proofread by PSA Easwaran

---

*Raja Nalakritam Charmamundadevi Stotram*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*